## प्राक्कथनम्

दर्शनशास्त्रेषु भारतीयदर्शने विशेषतो वेदान्तदर्शने विवेच्या विषया बहव: सन्ति । विवेचयितव्येषु विषयेषु विचारविमर्श प्राप्तेषु विवेचकानां मनसि विमूढतां विस्मयश्च युगपत् जागरूको जायते । प्रत्येकं विषय-मवलम्ब्यैव सूक्ष्मा: समीक्षा: विधातुं युज्यते । तथापि तेषु विषयेष्वनेकेषु सत्स्वपि जीवन्मुक्ते: स्वरूपविवेचनं नामविषयं गवेषणीयविषयत्वेन निरदी-धरम् । तत्र कारणं स्थूलमेवात्र प्रथममुपन्यस्यते ।

यदि कश्चित् "जीवन्मुक्ति"शब्दं शृणुयात्तदा तस्यास्य शब्दस्या-र्थानुसन्धानेऽसम्भावनापतेदेव । यतो हि, "जीवन्मुक्ति"शब्दस्य जीवतो-मुक्तिरित्येवमर्थ: प्राप्यते ; एतच्च व्याहतं ; यथा मूकस्य मुखात् सूक्तिर्न विश्वास्या, तथैव जीवतो मुक्तिर्न विश्वास्या । वेदान्तशास्त्रस्य यथा-कथञ्चिच्चर्चाकाले शब्दोऽयं श्रुतिपथमायात: । पुराणादिष्वप्ययं शब्द: पुन: पुन: प्राप्यते । शब्दमिमं श्रुत्वा षष्ठीतत्पुरुषसमासलब्धमर्थञ्च बुद्ध्वा चित्तं मदीयमाकृष्टं जातम् । भारतीयदार्शनिकेषु सूक्ष्मतमचिन्ताविशारदेषु जीवन्मुक्ति-शब्दस्य समादरोऽनादरो वा ।

जीवन्मुक्ते: स्वीकारे तेषामुपपादनप्रक्रिया प्रमाणप्रदर्शनरीतिश्च कीदृशी -- इति विज्ञातुं मम चेतसि आग्रह: कौतूहलञ्च समुत्पन्नम् । तत

एव चाल्तितोऽहं मितमतिरपि दुरवगाहेऽस्मिन् विषये गवेषणायामुद्यत: प्रवृत्तश्च ।

तत्रास्मिन् निवन्धे षष्ठ-अध्याया आलोच्यविषयवैविध्येन विभक्ता: कृता: । मूलप्रवन्धे ऊहापोहवाहुल्येन प्रतिपदं प्रकृष्टप्रमाणप्रयोगेन च विवेच्यविषयाणां स्पष्टत: सूक्ष्मतश्च विवेचनं विहितम् । अत्र समासत: वाहुल्यं विहाय स्थूलेन विवेचितानां विषयाणां दिग्दर्शनं क्रियते । प्रयोजनाभावाद्विदुषां सुवोध्यत्वाच्च पादटीकायां वक्तव्यसमर्थकानि प्रमाणानि प्रायशो नोद्ध्रियन्ते । मूलनिवन्धे तानि यथास्थानं यथायोगं दर्शितानि वर्त्तन्ते । अतोऽत्राधुनाऽध्यायक्रमं विवेच्यविषया: प्रदर्श्यन्ते ।
अन्ते किञ्चित् समङ्कोचं निरेद्यते --

संस्कृतवाक्यटङ्कणे यन्त्रस्य न तादृशी उन्नति पटुता वा लक्ष्यते । अतो टङ्कणप्रमादा: सर्वथा अपरिहरणीया एव जाता । अवहितेनापि मया प्रमादा न परिहर्त्तुं शक्यन्ते । न केवलं यन्त्रस्य अपाटवम्, टङ्कणकर्त्तुरपि संस्कृतभाषानभिज्ञाता प्रमादानामस्तित्वे कारणम् । अत: अवशेन मया अन्ततो गत्वा क्षमा प्राथ्यते ।